www.shodhpith.com ISSN (Online): 3049-3331

Shodhpith
International Multidisciplinary
Research Journal
(International Open Access, Peer-reviewed & Refereed Journal)
(Multidisciplinary, Bimonthly, Multilanguage)

Volume: 2 Issue: 3 May-June 2026

# स्फोटः ध्वनिश्च, शब्दब्रह्मणः द्वे व्याख्ये

**Dr. Lathakumary. P. C**

*Associate Professor, Department of Sanskrit, St. Thomas college, Kozhenchery, P. O, Pathanamthitta.*

**Article Info**: *(Recieved- 18/03/2026, Accept- 10/4/2026, Published- 10/05/2026)*

**DOI-** 10.64127/Shodhpith.2026v2i3004

## सारांशः

भारतीयदार्शनिकपरम्परायां शब्दस्य स्वरूपं तस्य अर्थप्रतिपादनशक्तिश्च सदैव गम्भीरविमर्शस्य विषयः आसीत्। अस्मिन् सन्दर्भे द्वौ महत्त्वपूर्णौ सिद्धान्तौ विशेषतया प्रसिद्धौ स्तः, स्फोटवादः ध्वनिसिद्धान्तश्च। स्फोटवादः व्याकरणदर्शनस्य मूलभूतः सिद्धान्तः अस्ति यत्र भर्तृहरिणा वाक्यपदीये[1] शब्दस्य अर्थवाहकत्वं स्फोटतत्त्वद्वारा प्रतिपादितम्। ध्वनिसिद्धान्तः तु काव्यशास्त्रस्य क्षेत्रे आनन्दवर्धनेन ध्वन्यालोके[3] प्रतिपादितः यत्र व्यङ्ग्यार्थः काव्यस्य आत्मा इति प्रदर्शितम्। उभौ सिद्धान्तौ शब्दब्रह्मणः भिन्नभिन्नपक्षौ उद्घाटयतः, स्फोटवादः भाषायाः दार्शनिकस्वरूपं प्रकटयति, ध्वनिसिद्धान्तः तु काव्यात्मकसौन्दर्यम्। अस्मिन् शोधपत्रे उभयोः सिद्धान्तयोः ऐतिहासिकविकासः, दार्शनिकाधारः, तुलनात्मकविश्लेषणं च प्रस्तूयते, तेन शब्दब्रह्मणः समग्रं स्वरूपं प्रतीयते। स्फोटवादस्य उद्भवः पाणिनेः अष्टाध्याय्याः[4] पतञ्जलेः महाभाष्यस्य[2] च परम्परायां दृश्यते, भर्तृहरेः वाक्यपदीये च तस्य पूर्णविकासः प्राप्तः। ध्वनिसिद्धान्तस्य विकासः रसवादिनां परम्परायां दृश्यते, आनन्दवर्धनस्य ध्वन्यालोके तस्य परमोत्कर्षः, अभिनवगुप्तस्य लोचने च तस्य दार्शनिकगहनता प्राप्ता। अस्मिन् शोधपत्रे एतयोः सिद्धान्तयोः समन्वयात्मकं दर्शनं प्रस्तूयते।

**मुख्यशब्दा**– स्फोटवादः, ध्वनिसिद्धान्तः, शब्दब्रह्मन्, भर्तृहरिः, आनन्दवर्धनः, वाक्यपदीयम्, व्यङ्ग्यार्थः, प्रतिभा, पतञ्जलिः अभिनवगुप्तः।

## प्रस्तावना

भारतीयदर्शनपरम्परायां शब्दस्य स्थानं अत्यन्तं महत्त्वपूर्णम् अस्ति। वेदेषु वाक् देवता इति मन्यते, ऋग्वेदे च वागेव विश्वा भुवनानि जज्ञेश् इति उक्तम्। उपनिषत्सु ब्रह्मणः शब्दात्मकत्वं प्रतिपादितम्, प्रजापतिर्वै इदमग्रे आसीत्, तस्य वाक् द्वितीया आसीत्श् इति। एवं शब्दः केवलं सम्प्रेषणसाधनं नास्ति अपितु सत्तामूलकतत्त्वम् इति भारतीयदार्शनिकानां मतम्। अस्मिन् पृष्ठभूमौ भाषायाः अर्थप्रतिपादनप्रक्रिया कथं सम्पद्यते इति प्रश्नः उदेति। वैदिककालात् एव भारतीयचिन्तकाः भाषायाः स्वरूपं विमृशन्ति स्म। निरुक्ते यास्कः शब्दार्थसम्बन्धस्य विवेचनं करोति, व्याकरणशास्त्रे पाणिनिः[4] भाषायाः संरचनां नियमयति। अयं प्रश्नः भारतीयदर्शने बहुविधं विमृष्टः। नैयायिकाः शब्दार्थसम्बन्धं सङ्केतरूपेण मन्यन्ते, मीमांसकाः तु शब्दस्य नित्यत्वम् अर्थस्य च स्वाभाविकसम्बन्धं प्रतिपादयन्ति।[6] बौद्धाः क्षणिकवादानुसारेण शब्दस्य अनित्यत्वं प्रतिपादयन्ति। एवं भाषाविषयकं चिन्तनं भारतीयदर्शनस्य सर्वेषु सम्प्रदायेषु व्याप्तम् अस्ति।

एतेषां विविधानां मतानां मध्ये द्वौ सिद्धान्तौ विशेषतया ध्यानार्हौ, स्फोटवादः ध्वनिसिद्धान्तश्च। स्फोटवादस्य मूलं

व्याकरणशास्त्रे अस्ति। पाणिनिना अष्टाध्याय्यां[4] स्फोटशब्दस्य सूचना कृता, पतञ्जलिना च महाभाष्ये[2] तस्य विस्तृतं विवेचनं प्रस्तुतम्। किन्तु भर्तृहरेः वाक्यपदीयम्[1] एव स्फोटवादस्य सर्वाङ्गीणं प्रतिपादनं करोति। भर्तृहरिः शब्दब्रह्मणः सिद्धान्तं प्रतिपाद्य भाषां परमतत्त्वस्य अभिव्यक्तिरूपेण प्रतिपादयति। तस्य मते शब्दतत्त्वम् एव ब्रह्म अस्ति, सर्वं ज्ञानं शब्दपूर्वकम् अस्ति, शब्दं विना कोऽपि व्यवहारः असम्भवः। अपरपक्षे ध्वनिसिद्धान्तः काव्यशास्त्रस्य क्षेत्रे आनन्दवर्धनेन[3] प्रवर्तितः। अस्मिन् सिद्धान्ते काव्ये व्यङ्ग्यार्थस्य प्राधान्यं प्रदर्शितम् , काव्यस्य वास्तविकं सौन्दर्यं प्रत्यक्षार्थे नास्ति अपितु तस्य पृष्ठभूमौ ध्वनिरूपेण स्थिते सूक्ष्मार्थे अस्ति।

स्फोटवादस्य ध्वनिसिद्धान्तस्य च तुलनात्मकम् अध्ययनं बहुमूल्यम् अस्ति यतः उभौ भाषायाः गूढार्थप्रतिपादनशक्तिं विविच्य प्रदर्शयतः। स्फोटवादः दार्शनिकदृष्ट्या भाषायां अर्थः कथम् अन्तर्निहितः इति विचारयति, ध्वनिसिद्धान्तः तु सौन्दर्यशास्त्रीयदृष्ट्या काव्ये अर्थः कथं ध्वन्यते इति प्रतिपादयति। मैटिलालमहोदयेन[8] यथा उक्तम्, भारतीयभाषाचिन्तनं पाश्चात्यभाषाविज्ञानात् भिन्नं तत्त्वमीमांसात्मकम् अस्ति यत्र भाषा केवलं सम्प्रेषणसाधनं नास्ति अपितु सत्तायाः एव अभिव्यक्तिः। अस्मिन् शोधपत्रे उभयोः सिद्धान्तयोः समग्रं तुलनात्मकम् अध्ययनं प्रस्तूयते। प्रथमं स्फोटवादस्य ऐतिहासिकविकासः तस्य स्वरूपं च विमृश्यते, ततः वाक्यस्फोटवादः तस्य विरोधिनश्च विचार्यन्ते। तदनन्तरं ध्वनिसिद्धान्तस्य स्वरूपं प्रतिपाद्य उभयोः तुलनात्मकविश्लेषणं क्रियते। अन्ते शब्दब्रह्मणः एकीकृतदृष्टिः आधुनिकप्रासङ्गिकता च प्रतिपाद्यते।

## स्फोटसिद्धान्तस्य ऐतिहासिकः विकासः

स्फोटसिद्धान्तस्य मूलं वैदिककालीनभाषाचिन्तने अन्वेषितुं शक्यते। वेदेषु वाक्तत्त्वस्य गूढत्वं बहुत्र प्रतिपादितम्। ऋग्वेदे (१.१६४.४५) चत्वारि वाक्पदानि परिमिता पदानि इति उल्लेखः अस्ति यः भर्तृहरेः चतुर्विधवाक्सिद्धान्तस्य पूर्वसूचकः मन्यते। अस्मिन् ऋग्वेदमन्त्रे वाचः चत्वारः स्तराः सूचिताः, तेषां त्रीन् गुहायां निहितान् मनुष्याः न जानन्ति, चतुर्थमेव वदन्ति। अयं विचारः उत्तरकाले भर्तृहरेः परा,पश्यन्ती,मध्यमा, वैखरी इति चतुर्विधवाक्सिद्धान्ते पूर्णतां प्राप्नोति। पाणिनिना अष्टाध्याय्याम्[4] स्फोटायनः इति आचार्यनाम उल्लिखितम् (अष्टाध्यायी ६.१.१२३) यत् स्फोटवादस्य पाणिनिपूर्वकालीनत्वं सूचयति। कार्डोनामहोदयेन[12] स्फोटायनस्य ऐतिहासिकस्थानं विस्तरेण विमृष्टम्। पाणिनेः सूत्रेषु शब्दस्वरूपस्य विषये सूक्ष्मं चिन्तनं दृश्यते यत्र शब्दरूपाणां नियमनं सूत्ररूपेण कृतम्। पाणिनिः भाषायाः संरचनात्मकं विश्लेषणं कृत्वा व्याकरणशास्त्रस्य आधारं स्थापितवान् यत् परवर्तिभिः आचार्यैः स्फोटवादस्य विकासार्थम् उपयुक्तम्।

पतञ्जलिः महाभाष्ये[2] स्फोटसिद्धान्तस्य प्रथमं व्यवस्थितं प्रतिपादनं करोति। पतञ्जलिः श्स्फोटः शब्दः, ध्वनिः शब्दगुणः' इति स्पष्टतया वदति, अर्थात् स्फोटः एव वास्तविकः शब्दः अस्ति, ध्वनिः तु तस्य गुणमात्रम्। पतञ्जलिः शब्दस्य नित्यत्वं प्रतिपाद्य स्फोटं ध्वनेः पृथक् तत्त्वत्वेन स्थापयति। महाभाष्ये पस्पशाह्निके शब्दस्वरूपविषये विस्तृतं विवेचनम् अस्ति यत्र शब्दस्य नित्यत्वं, अपौरुषेयत्वं, स्फोटात्मकत्वं च प्रतिपादितम्। पत

ञ्जलिः प्रश्नं उत्थापयति, अथ गौरित्यत्र कः शब्दः? इति। तत्र सः दर्शयति यत् 'ग' 'औ' ':' इति वर्णाः शब्दः नास्ति, अपितु तैः प्रकाशितः कश्चित् अन्यः तत्त्वं शब्दः, अयम् एव स्फोटः। ब्रॉमहोदयेन[15] संस्कृतवैयाकरणानां भाषाविषयकचिन्तनस्य सामान्यभाषाविज्ञानिकमहत्त्वं प्रदर्शितम्। पतञ्जलेः अयं विचारः उत्तरकालीनस्फोटवादस्य आधारशिला अभवत्।

भर्तृहरिः (प्रायः पञ्चमशतकम्) स्फोटवादस्य सर्वोत्कृष्टः प्रतिपादकः अस्ति। तस्य वाक्यपदीये[1] त्रिषु काण्डेषु शब्दब्रह्मणः सिद्धान्तः विस्तरेण प्रतिपादितः। प्रथमं ब्रह्मकाण्डं शब्दब्रह्मणः तात्त्विकस्वरूपं प्रतिपादयति, तत्र शब्दतत्त्वस्य ब्रह्मत्वं, वाचः चतुर्विधस्तरः, शब्दस्य नित्यत्वं च विवृतम्। द्वितीयं वाक्यकाण्डं वाक्यस्फोटस्य सिद्धान्तं विवृणोति, तत्र वाक्यं भाषायाः मूलभूतम् एककम् इति, प्रतिभा वाक्यार्थज्ञानस्य स्वरूपम् इति च प्रतिपादितम्। तृतीयं पदकाण्डं (प्रकीर्णकम्) पदार्थविचारं प्रस्तौति, तत्र जातिः, द्रव्यं, क्रिया, गुणः, सम्बन्धः इत्यादयः पदार्थाः विमृष्टाः। अय्यरमहोदयेन[7] भर्तृहरेः दर्शनस्य प्राचीनव्याख्यानानां प्रकाशे समग्रम् अध्ययनं कृतम्। भर्तृहरिः शब्दब्रह्मणः अवधारणां प्रतिपाद्य भाषादर्शनं तत्त्वमीमांसायाः स्तरे उन्नयति। तस्य मते शब्दतत्त्वम् एव ब्रह्म अस्ति, अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्' (वाक्यपदीयम् १.१) इति प्रसिद्धं वचनम्।

भर्तृहरेः अनन्तरं स्फोटवादस्य विकासः अनेकैः विद्वद्भिः कृतः। मण्डनमिश्रः स्फोटसिद्ध्यां स्फोटवादस्य मीमांसादार्शनिकपृष्ठभूमौ विवेचनं करोति, तत्र सः कुमारिलस्य आक्षेपान् प्रतिवदन् स्फोटवादस्य समर्थनं करोति। कौण्डभट्टः वैयाकरणभूषणे स्फोटवादस्य नव्यन्यायशैल्या प्रतिपादनं करोति, तस्य तार्किकपद्धतिः स्फोटवादस्य दार्श.

निकदृढतां वर्धयति। नागेशभट्टः तु वैयाकरणसिद्धान्तमञ्जूषायां स्फोटवादस्य अन्तिमं परिष्करणं करोति यत्र सर्वेषां पूर्ववादिनां मतानां समन्वयः कृतः। हौबेनमहोदयेन[11] भर्तृहरेः सम्बन्धसमुद्देशस्य विश्लेषणद्वारा स्फोटवादस्य दार्शनिकग. हनता प्रदर्शिता। ब्रोङ्कहोर्स्टमहोदयेन[18] स्फोटसिद्धान्तस्य प्रारम्भिकइतिहासः विस्तरेण विमृष्टः, वाक्यपदीयस्य २.११६ सूत्रस्य विशेषविश्लेषणं च कृतम्। एवं स्फोटवादः शताब्दीभ्यः विकसितः भारतीयभाषादर्शनस्य केन्द्रीयसिद्धान्तः अभवत्। पाणिनेः कालात् आरभ्य नागेशभट्टपर्यन्तं सहस्रवर्षाधिककालं यावत् अयं सिद्धान्तः विकसितः परिष्कृतश्च अभवत्।

## स्फोटस्य स्वरूपम्

स्फोटशब्दः 'स्फुट्' धातोः निष्पन्नः यस्य अर्थः स्फुटीभवनम् अथवा प्रकटीकरणम् इति। व्युत्पत्तिशः स्फोटः सः तत्त्वः अस्ति यतः अर्थः स्फुटीभवति अथवा प्रकटीभवति। स्फोटः सः भाषिकः तत्त्वः अस्ति यः अर्थं प्रकटयति अथवा श्स्फोटयतिश। भर्तृहरेः[1] मते स्फोटः ध्वनेः सर्वथा भिन्नः अस्ति। ध्वनिः (नादः) भौतिकध्वनिः अस्ति यः कर्णगोचरः भवति, यः वायुकम्पनरूपः, क्षणिकः, नानावक्तृभिः भिन्नभिन्नरूपेण उच्चार्यते। स्फोटः तु तस्य पृष्ठभूमौ स्थितः अर्थवाहकः तत्त्वः। यथा दीपः प्रकाशयति पदार्थान् तथा ध्वनिः प्रकाशयति स्फोटम्, अर्थात् ध्वनिः स्फोटस्य अभिव्यञ्जकः अस्ति, उत्पादकः नास्ति। स्फोटः नित्यः अस्ति, ध्वनिः तु अनित्यः क्षणिकश्च। यथा सूर्यप्रकाशः पदार्थान् प्रकाशयति किन्तु तान् उत्पादयति नास्ति, तथा ध्वनिः स्फोटम् अभिव्यनक्ति किन्तु तम् उत्पादयति नास्ति।

स्फोटस्य ध्वनेश्च भेदं स्पष्टीकर्तुं भर्तृहरिः अनेकानि उदाहरणानि प्रयुङ्क्ते। यदा कश्चित् 'गौः' इति शब्दं वदति तदा 'ग', 'औ', 'ः' इति वर्णाः क्रमशः उच्चार्यन्ते, एते ध्वनयः। एतेषां ध्वनीनां गुणाः भिन्नभिन्नाः भवन्ति, कश्चित् मन्द्र. स्वरेण वदति, कश्चित् तारस्वरेण, कश्चित् द्रुतं वदति, कश्चित् विलम्बितम्। किन्तु 'गौः' इत्यस्य समग्रः अर्थः (गोत्वं भवति) कश्चित् एकः अखण्डः प्रत्ययः अस्ति यः क्रमशः उच्चारितैः वर्णैः न निर्मीयते अपितु तैः अभिव्यज्यते, अयम् एव स्फोटः। ध्वनीनां विविधता स्फोटं न परिवर्तयति, मन्द्रस्वरेण उच्चारितस्य 'गौः' इत्यस्य अर्थः सः एव यः तारस्वरेण उच्चारितस्य। कावर्डराजाभ्यां[6] वैयाकरणदार्शनिकानां शब्दविषयकचिन्तनं समग्रतया प्रतिपादितम्। स्फोटः अखण्डः (अविभाज्यः) अस्ति, तं क्रमशः वर्णेषु विभक्तुं न शक्यते। यथा चित्रे समग्रं दृश्यं एककालं गृह्यते न च तत् रेखासु बिन्दुषु च विभज्यते, तथा स्फोटः समग्रार्थं एककालं प्रतिपादयति।

भर्तृहरिः वाक्तत्त्वस्य चतुर्विधं स्तरं प्रतिपादयति, परा, पश्यन्ती, मध्यमा, वैखरी च।[1] परा वाक् परमतत्त्वस्य (शब्दब्रह्मणः) स्तरः अस्ति यत्र वक्ता श्रोता अर्थश्च अभिन्नाः सन्ति, अयं स्तरः सर्वव्यापी, अविभक्तः, शुद्धचौतन्यरूपः अस्ति। पश्यन्ती वाक् तत्र अस्ति यत्र अर्थः अस्फुटरूपेण अवभासते, यथा कवेः चेतसि काव्यस्य बीजम् अस्फुटरूपेण विद्यते किन्तु शब्दरूपं न प्राप्नोति। पश्यन्ती स्तरे ज्ञानम् एकरसम् अविभक्तं च अस्ति। मध्यमा वाक् मानसिकस्तरे अस्ति यत्र शब्दाः अर्थाश्च विभक्ताः भवन्ति किन्तु वाचिकरूपं न प्राप्नुवन्ति, यथा मनसि विचारः शब्दरूपेण चलति किन्तु बहिः उच्चार्यते नास्ति। वैखरी तु बाह्योच्चारणस्तरः अस्ति यत्र ध्वनयः श्रवणगोचराः भवन्ति, अयं स्तरः स्थूलः, भौतिकः, इन्द्रियगोचरश्च। एतेषु चतुर्षु स्तरेषु स्फोटः मध्यमायाः वैखर्याश्च मध्ये स्थित्वा अर्थं प्रकटयति। देशपाण्डेमहा. `दयेन[16] वाक्यप्रत्ययस्य शाब्दिकाभिधानसिद्धान्तानां च विषये गहनं विवेचनं कृतम्।

स्फोटस्य अखण्डत्वं तस्य मुख्यं लक्षणम् अस्ति। भर्तृहरेः मते अर्थः अखण्डः अस्ति , तं भागेषु विभक्तुं न शक्यते। यथा 'वृक्षः' इत्यस्य अर्थः कश्चित् एकः समग्रः प्रत्ययः अस्ति यं 'ट',' ृ', 'क', 'ष', 'ः' इति वर्णेषु विभक्तुं न शक्यते। एवमेव वाक्यस्तरे 'ग्रामं गच्छति बालकः' इत्यस्य समग्रार्थः एकः अखण्डः स्फोटः अस्ति, 'ग्रामं', 'गच्छति', 'बालकः' इति पदानां पृथक् अर्थाः मिलित्वा वाक्यार्थं न रचयन्ति अपितु समग्रवाक्यार्थः एकः अखण्डः प्रत्ययः अस्ति। सैडरिट्समहा. `दयेन[13] भर्तृहरेः बौद्धदार्शनिकैः सह वादविवादस्य सन्दर्भे स्फोटवादस्य विशिष्टता प्रदर्शिता। स्फोटस्य अयं अखण डत्वसिद्धान्तः भारतीयभाषादर्शनस्य अद्वितीयं योगदानम् अस्ति यत् पाश्चात्यभाषाविज्ञानस्य परमाणुवादात् (जवउपेउ) सर्वथा भिन्नम् अस्ति। पाश्चात्ये भाषाविज्ञाने शब्दः ध्वनिएककानां (चीवदमउमे) समूहः मन्यते, किन्तु भर्तृहरेः मते शब्दः अखण्डः स्फोटरूपः अस्ति।

## वाक्यस्फोटवादः

भर्तृहरेः दर्शनस्य सर्वाधिकं क्रान्तिकारी पक्षः वाक्यस्फोटवादः अस्ति। भर्तृहरिः प्रतिपादयति यत् वाक्यम् एव भाषायाः मूलभूतम् एककम् अस्ति, पदं तु वाक्यात् कृत्रिमतया विभक्तम्।[1] अयं सिद्धान्तः भारतीयभाषाचिन्तने तीव्रं वादविवादम् उत्पादितवान्। पदवादिनः (यथा मीमांसकाः) मन्यन्ते यत् पदानि मूलभूतानि सन्ति वाक्यं तु पदसमूहः।

किन्तु भर्तृहरिः अस्य विपरीतं वदति, वाक्यं मूलभूतम्, पदानि तु वाक्यात् कृत्रिमतया विभक्तानि। वाक्यपदीये (२.१) स्पष्टतया उक्तम्, श्एकमेव अनवयवं वाक्यं तत्प्रतिपद्यतेश इति। अय्यरमहोदयेन[7] अस्य सिद्धान्तस्य प्राचीनव्याख्यानानां प्रकाशे विस्तृतम् अध्ययनं कृतम्। भर्तृहरिः तर्कयति यत् यदा बालकः भाषां शिक्षते तदा सः प्रथमं समग्रवाक्यानि शृणोति, न तु पृथक्पदानि, अतः वाक्यं प्राकृतिकम् (natural), पदविभागः तु कृत्रिमः (Artificial)।

वाक्यस्फोटवादस्य केन्द्रीयं तत्त्वं प्रतिभा अस्ति। प्रतिभा इति तत् ज्ञानम् अस्ति यत् वाक्यार्थस्य श्रवणानन्तरं श्रोतुः चेतसि एककालं स्फुरति। भर्तृहरिः वदति यत् वाक्यार्थज्ञानं क्रमशः पदार्थज्ञानानां संयोगात् न जायते अपितु तत् एकः अखण्डः प्रतिभात्मकः प्रत्ययः अस्ति। यदा कश्चित् 'आनय गां' इति वाक्यं शृणोति तदा तस्य चेतसि श्गोत्वम्श आनयनक्रिया इति पृथक् ज्ञानानि उत्पद्य ततः संयुज्यन्ते इति न भवति, अपितु समग्रवाक्यार्थः एककालं प्रतिभारूपेण स्फुरति। भर्तृहरिः प्रतिभायाः लक्षणं वदति, 'प्रतिभा अपूर्वं ज्ञानम्' इति, अर्थात् प्रतिभा कश्चित् नूतनः, अपूर्वः, समग्रः प्रत्ययः अस्ति यः पूर्वज्ञानानां संयोगात् न जायते। अयं प्रतिभासिद्धान्तः आधुनिकसंज्ञानात्मकभाषाविज्ञानस्य[8] होलिरि: टकदृष्ट्या साम्यं धारयति, यत्र अर्थज्ञानं समग्रम् अस्ति भागशः न भवति।

भारतीयभाषाचिन्तने अर्थप्रतिपादनविषये त्रयः प्रमुखाः वादाः सन्ति, पदवादः, वाक्यवादः, आकृतिवादश्च। पदवादे (प्रभाकरमीमांसकानां मतम्) पदानि मूलभूतानि अर्थप्रतिपादकानि, वाक्यं तु पदार्थानां समूहमात्रम्। अस्मिन् मते प्रत्येकं पदं स्वार्थं प्रतिपादयति, ततः पदार्थानां परस्परसम्बन्धात् वाक्यार्थः जायते। वाक्यवादे (भर्तृहरेः मतम्) वाक्यम् एव मूलभूतम्, पदानि तु कल्पिततत्त्वानि, वाक्यार्थः प्रतिभारूपेण एककालं गृह्यते, पदविभागः तु व्याकरणस्य कृत्रिमव्यवस्था। आकृतिवादे तु वाक्यस्य सामान्याकारः (आकृतिः) अर्थं प्रतिपादयति, वाक्यस्य रचनापद्धतिः (pattern) एव अर्थवाहिनी। भर्तृहरिः वाक्यवादस्य प्रबलं समर्थनं करोति, यत्र वाक्यस्फोटः अखण्डः अर्थवाहकः अस्ति। देशपाण्डेमहोदयेन16 एतेषां वादानां समीक्षात्मकं विश्लेषणं कृतम् यत्र उभयपक्षयोः शक्तिदौर्बल्ये प्रदर्शिते।

## स्फोटवादस्य विरोधिनः

स्फोटवादस्य सर्वाधिकं प्रबलः विरोधी कुमारिलभट्टः आसीत्। कुमारिलः श्लोकवार्त्तिके[5] स्फोटवादस्य विस्तृतं खण्डनं करोति। तस्य शब्दनित्यतावादे स्फोटपरीक्षाप्रकरणे स्फोटवादस्य प्रत्येकं पक्षं विस्तरेण निराकरोति। तस्य मुख्याः आक्षेपाः एवं सन्ति, प्रथमम्, स्फोटः कल्पितं तत्त्वम् अस्ति यस्य कोऽपि प्रमाणाधारः नास्ति, न प्रत्यक्षेण स्फोटः गृह्यते, न अनुमानेन सिद्ध्यति, न शब्दप्रमाणेन प्रतिपाद्यते। वर्णाः एव शब्दाः सन्ति, तेभ्यः पृथक् कश्चित् स्फोटः अस्तीति कल्पना अनावश्यकी। द्वितीयम्, यदि स्फोटः नित्यः अस्ति तर्हि तस्य अभिव्यक्तिः कथं सम्भवति, नित्यवस्तु सदा अभिव्यक्तम् एव अस्ति, तस्य पुनः अभिव्यक्तिः इति विरोधः। तृतीयम्, पदानां अर्थः सङ्केतद्वारा निश्चितः, अतः स्फोटकल्पना निरर्थका।

नैयायिकाः अपि स्फोटवादं निराकुर्वन्ति। न्यायदर्शने शब्दः प्रमाणचतुष्टयस्य एकम् अस्ति, शब्दप्रमाणम्। नैयायिकानां मते शब्दार्थसम्बन्धः सङ्केतजन्यः (convention, based) अस्ति। ईश्वरः सर्वप्रथमं शब्दार्थसङ्केतं स्थापय. ति, ततः परम्परया तस्य ज्ञानं प्रसरति। अस्मिन् मते स्फोटस्य कल्पनया कोऽपि प्रयोजनं नास्ति यतः वर्णसमूहः एव शब्दः अस्ति, सङ्केतः एव अर्थसम्बन्धः। नैयायिकाः वदन्ति यत् स्फोटकल्पना 'गौरवदोषेण' दूषिता, अर्थात् श्लाघवम्श इति तत्त्वज्ञानस्य नियमः भग्नः, यतः वर्णसमूहेन एव कार्यसिद्धौ स्फोटकल्पना अनावश्यकी। उद्योतकरः, वाचस्पति. मिश्रः, उदयनः च नैयायिकपक्षात् स्फोटवादस्य विविधान् आक्षेपान् प्रस्तुतवन्तः। स्टालमहोदयेन[19] भारतीयदार्शनिकानां अधिभाषाविषयकचिन्तनं विस्तरेण विमृष्टम् यत्र नैयायिकानां शब्दविचारः अपि समाविष्टः।

बौद्धदार्शनिकाः अपि स्फोटवादस्य तीव्रं विरोधं कुर्वन्ति। बौद्धमतानुसारं सर्वं क्षणिकम् अस्ति (क्षणिकवादः), अतः शब्दस्य नित्यत्वम् अस्वीकार्यम्। यदि शब्दः क्षणिकः अस्ति तर्हि नित्यस्फोटस्य कल्पना असम्भवा। दिङ्नागः शब्दा. र्थसम्बन्धे अपोहवादं प्रतिपादयति, शब्दः स्वार्थं न प्रतिपादयति अपितु अन्यापोहद्वारा (exclusion of the other) अर्थं गमयति। यथा 'गौः' इति शब्दः 'गोत्वम्' इति सकारात्मकार्थं न प्रतिपादयति अपितु श्अगवां सर्वेषाम् अपोहम्श करोति, अर्थात् यत् गौः नास्ति तस्य निषेधद्वारा गोत्वं गम्यते। अपोहवादे स्फोटस्य कल्पनायाः कोऽपि अवकाशः नास्ति यतः शब्दार्थसम्बन्धः स्वयं निषेधात्मकः अस्ति, कश्चित् सकारात्मकः अखण्डः अर्थतत्त्वः नास्ति। धर्मकीर्तिः अपि स्फोटवादं निराकृत्य अपोहवादस्य परिष्करणं करोति। सैडरिट्समहोदयेन[13] भर्तृहरेः बौद्धानां च वादविवादस्य विस्तृतं विश्लेषणं कृतम् यत्र उभयपक्षयोः दार्शनिकाधाराः स्पष्टीकृताः। एतेषां विरोधिनां आक्षेपाः स्फोटवादस्य परिष्कारे सहायकाः अभवन्, तेषां प्रत्युत्तररूपेण स्फोटवादिनः स्वसिद्धान्तं अधिकं सुदृढं कृतवन्तः।

## ध्वनिसिद्धान्तस्य स्वरूपम्

ध्वनिसिद्धान्तस्य प्रवर्तकः आनन्दवर्धनः (नवमशतकम्) अस्ति यः काश्मीरप्रदेशस्य विद्वान् आसीत्। तस्य ध्वन्यालोकः3 संस्कृतकाव्यशास्त्रे क्रान्तिकारी ग्रन्थः अस्ति यत्र श्काव्यस्य आत्मा ध्वनिःश इति प्रतिपादितम्। आनन्दवर्धनात् पूर्वम् अनेकाः काव्यसिद्धान्ताः प्रचलिताः आसन् , भामहः श्अलङ्कारः एव काव्यस्य शोभाकारकःश इति मन्यते स्म, दण्डी श्काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षतेश इति वदति, वामनः तु श्रीतिरात्मा काव्यस्यश इति प्रतिपादयति। किन्तु आनन्दवर्धनः प्रतिपादयति यत् काव्यस्य वास्तविकं सौन्दर्यं वाच्यार्थे लक्ष्यार्थे वा नास्ति अपितु व्यङ्ग्यार्थे अस्ति , यः ध्वनिरूपेण प्रतीयते। अलङ्काराः रीतयश्च काव्यस्य बाह्यशोभा, ध्वनिः तु तस्य आत्मा , यथा शरीरस्य अलङ्काराः बाह्याः किन्तु आत्मा आन्तरिकः। डेमहोदयेन[10] संस्कृतकाव्यशास्त्रस्य इतिहासे ध्वनिसिद्धान्तस्य स्थानं विस्तरेण प्रतिपा. दितम्।

ध्वनिसिद्धान्तानुसारं काव्ये त्रिविधः अर्थः अस्ति , वाच्यार्थः, लक्ष्यार्थः, व्यङ्ग्यार्थश्च। वाच्यार्थः (अभिधाशक्तिजन्यः) शब्दस्य प्रत्यक्षार्थः अस्ति , यथा श्गङ्गाश इत्यस्य वाच्यार्थः गङ्गानदी। लक्ष्यार्थः (लक्षणाशक्तिजन्यः) मुख्यार्थबाधे गौणार्थस्य ग्रहणम्, यथा गङ्गायां घोषः इत्यत्र गङ्गायाः तटे इति अर्थः लक्षणया गम्यते यतः गङ्गायां (जले) घोषस्य स्थापनं असम्भवम्। व्यङ्ग्यार्थः (व्यञ्जनाशक्तिजन्यः) तु वाच्यलक्ष्ययोः अतिरिक्तः सः सूक्ष्मार्थः अस्ति यः काव्ये ध्वन्यते, सूचितः भवति। यथा गङ्गायां घोषः इत्यत्र व्यङ्ग्यार्थः 'घोषस्य पावित्र्यम्, शीतलता' इत्यादिः। आनन्दवर्धनस्य मते अयम् एव व्यङ्ग्यार्थः काव्यस्य आत्मा अस्ति। इङ्गाल्समासनपाटवर्धनमहोदयैः[9] ध्वन्यालोकस्य लोचनव्याख्यासहितं समग्रं अनुवादं प्रस्तुतम्।

आनन्दवर्धनः ध्वनेः त्रीन् प्रकारान् वर्णयति, वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिश्च। वस्तुध्वनौ कश्चित् वस्तुविषयकः अर्थः व्यङ्ग्यते, यथा कालिदासस्य मेघदूते यक्षः मेघं दूतं प्रेषयति, तत्र मेघस्य वर्णनेन विरहवेदनायाः तीव्रता व्यङ्ग्यते। अलङ्कारध्वनौ कश्चित् अलङ्कारः (उपमा, रूपकम् इत्यादिः) व्यङ्ग्यते, यत्र वाच्यार्थः सामान्यः किन्तु व्यङ्ग्यरूपेण कश्चित् अलङ्कारः प्रतीयते। रसध्वनिः तु सर्वोत्कृष्टः प्रकारः अस्ति यत्र काव्ये रसः (शृङ्गारः, करुणा, वीरः, रौद्रः, हास्यः, भयानकः, बीभत्सः, अद्भुतः, शान्तश्च) व्यङ्ग्यते। रसध्वनिः काव्यस्य परमप्रयोजनम् अस्ति यतः रसानुभवः एव काव्यस्य परमफलम्, यथा भवभूतेः उत्तररामचरिते करुणरसस्य ध्वननं काव्यस्य प्राणभूतम्। मक्रीमहोदयेन[14] मध्यकालीनकाश्मीरकाव्यशास्त्रस्य उद्देश्यविचारः विस्तरेण प्रतिपादितः।

अभिनवगुप्तः (दशमशतकम्) ध्वनिसिद्धान्तस्य महत्त्वपूर्णः व्याख्याता अस्ति। तस्य लोचनव्याख्या ध्वन्यालोकस्य3 सर्वोत्कृष्टा व्याख्या मन्यते। अभिनवगुप्तः ध्वनिसिद्धान्तं प्रत्यभिज्ञादर्शनेन (काश्मीरशैवदर्शनेन) सह संयोज्य अस्य दार्शनिकगहनतां वर्धयति। तस्य मते रसानुभवः ब्रह्मानन्दसहोदरः अस्ति, साधारणीकरणम् इति प्रक्रियया काव्यस्य रसः सामान्यीकृत्य अनुभूयते। साधारणीकरणे श्रोता स्वकीयव्यक्तिगतसन्दर्भात् मुक्तः भूत्वा सामान्यमानवीयभावस्तरे रसम् अनुभवति, अयम् अनुभवः आध्यात्मिकमुक्तेः सदृशः अस्ति। अभिनवगुप्तस्य व्याख्यायां ध्वनिसिद्धान्तः केवलं काव्यविमर्श. सिद्धान्तः न भवति अपितु आध्यात्मिकानुभवस्य माध्यमम् अपि भवति। राजामहोदयेन[20] भारतीयार्थसिद्धान्तानां समग्रं विवेचनं कृतम् यत्र ध्वनिसिद्धान्तस्य स्थानं विशेषतया प्रदर्शितम्। पोल्लकमहोदयेन[17] संस्कृतभाषायाः सांस्कृतिकशक्तिं प्रदर्श्य काव्यशास्त्रस्य व्यापकप्रभावः प्रतिपादितः।

## स्फोटस्य ध्वनेश्च तुलनात्मकविश्लेषणम्

स्फोटवादस्य ध्वनिसिद्धान्तस्य च तुलनात्मकम् अध्ययनं भारतीयभाषाचिन्तनस्य गहनतां प्रकटयति। उभौ सिद्धान्तौ भाषायाः पृष्ठभूमिगतार्थस्य (प्रत्यक्षार्थातिरिक्तस्य) विषये विचारयतः, किन्तु तयोः दृष्टिकोणः, क्षेत्रं, प्रयोजनं च भिन्नम्। स्फोटवादः व्याकरणदर्शनस्य सिद्धान्तः अस्ति यः भाषायां अर्थः कथम् अन्तर्निहितः इति दार्शनिकदृष्ट्या विचारयति, तस्य प्रश्नः अस्तित्वमीमांसात्मकः (ontological) अस्ति। ध्वनिसिद्धान्तः तु काव्यशास्त्रस्य सिद्धान्तः अस्ति यः काव्ये अर्थः कथं सूचितः भवति इति सौन्दर्यशास्त्रीयदृष्ट्या विचारयति, तस्य प्रश्नः सौन्दर्यमीमांसात्मकः (esthetic) अस्ति। कावर्डराजाभ्यां[6] वैयाकरणदर्शनस्य समग्रं स्वरूपं प्रतिपादितम्, इङ्गाल्सादिमहोदयैः[9] च ध्वनिसिद्धान्तस्य सौन्दर्यशास्त्रीयपक्षः प्रकटितः।

स्फोटवादे ध्वनि शब्दस्य अर्थः भौतिकध्वनिः (acoustic sound, नादः) अस्ति यः स्फोटस्य अभिव्यञ्जकमात्रम्। ध्वनिसिद्धान्ते तु ध्वनि शब्दस्य अर्थः व्यङ्ग्यार्थः (suggested meaning) अस्ति। एवम् एकस्मिन् शब्दे (ध्वनि) द्वौ सर्वथा

भिन्नौ अर्थौ उपयुज्येते, अयं भेदः सदा स्मरणीयः, अन्यथा भ्रान्तिः सम्भवति। स्फोटवादे स्फोटः अर्थवाहकः, ध्वनिः तु तस्य अभिव्यञ्जकः, ध्वनिः स्फोटं प्रकटयति यथा दीपः पदार्थम्। ध्वनिसिद्धान्ते वाच्यार्थः अभिधानशक्त्या गम्यते, ध्वनिः तु व्यञ्जनाशक्त्या, वाच्यार्थः ध्वनिम् (व्यङ्ग्यार्थम्) प्रकटयति यथा दीपः छायाम्। स्फोटवादः प्रश्नं पृच्छति, श्शब्दात् अर्थः कथं जायते? भाषायां अर्थः कुत्र स्थितः? ध्वनिसिद्धान्तः प्रश्नं पृच्छति, श्काव्ये अर्थः कथं ध्वन्यते? काव्यानुभवस्य विशिष्टता कुत्र स्थिता? मैटिलालमहोदयेन[8] भारतीयभाषाचिन्तनस्य पाश्चात्यभाषाविज्ञानेन सह तुलनात्मकम् अध्ययनं कृतम्।

तथापि उभयोः सिद्धान्तयोः मध्ये गहनं साम्यम् अपि अस्ति। उभौ सिद्धान्तौ भाषायाः पृष्ठभूमिगतार्थस्य महत्त्वं प्रतिपादयतः शब्दस्य वास्तविकः अर्थः तत्र अस्ति यत्र प्रत्यक्षशब्दः न प्रापयति। स्फोटवादे स्फोटः ध्वन्यतिरिक्तः अखण्डार्थतत्त्वः, ध्वनिसिद्धान्ते व्यङ्ग्यार्थः वाच्यार्थातिरिक्तः सूक्ष्मार्थतत्त्वः। उभौ अपि भाषायाः श्अव्यक्तपक्षस्यश महत्त्वं प्रदर्शयतः। एवं स्फोटः ध्वनिश्च शब्दब्रह्मणः एकस्य तत्त्वस्य द्वे भिन्ने व्याख्ये इति मन्तुं शक्यते स्फोटवादः तस्य दार्श. निकपक्षः, ध्वनिसिद्धान्तः तु सौन्दर्यशास्त्रीयपक्षः। उभयोः सम्मिलनात् शब्दब्रह्मणः समग्रं दर्शनं प्राप्यते।

उभयोः सिद्धान्तयोः पूरकत्वं विशेषतया द्रष्टव्यम्। स्फोटवादः भाषायाः अस्तित्वमीमांसात्मकं (ontological) स्वरूपं प्रकटयति शब्दः ब्रह्मणः अभिव्यक्तिः अस्ति इति, भाषा सत्तायाः मूलतत्त्वम् इति। ध्वनिसिद्धान्तः भाषायाः सौन्दर्यम. ीमांसात्मकं (aesthetic) स्वरूपं प्रकटयति काव्यानुभवः ब्रह्मानुभवस्य सदृशः अस्ति इति, काव्यरसः आध्यात्मिकानन्दस्य प्रतिबिम्बः इति। एवम् उभौ मिलित्वा शब्दब्रह्मणः समग्रं दर्शनं प्रस्तुवतः एकः भाषायाः दार्शनिकतत्त्वम्, अपरः तस्य सौन्दर्यात्मकम् अभिव्यक्तिम्। यथा सूर्यस्य प्रकाशः उष्णता च एकस्य एव सूर्यस्य द्वे शक्ती तथा स्फोटः ध्वनिश्च शब्दब्रह्मणः द्वे शक्ती। हौबेनमहोदयेन[11] भर्तृहरेः भाषादर्शनस्य गहनता प्रदर्शिता, मक्रीमहोदयेन[14] च काव्यशास्त्रस्य दार्शनिकपृष्ठभूमिः प्रकटिता।

| पक्षः (Aspect) | स्फोटवादः (Sphoṭa) | ध्वनिसिद्धान्तः (Dhvani) |
|---|---|---|
| प्रवर्तकः | भर्तृहरिः (वाक्यपदीयम्) | आनन्दवर्धनः (ध्वन्यालोकः) |
| कालः | पञ्चमशतकम् | नवमशतकम् |
| क्षेत्रम् | व्याकरणदर्शनम् | काव्यशास्त्रम् |
| मुख्यप्रश्नः | अर्थः शब्दे कथम् अन्तर्निहितः? | अर्थः काव्ये कथं ध्वन्यते? |
| 'ध्वनि' इत्यस्य अर्थः | भौतिकनादः (acoustic sound) | व्यङ्ग्यार्थः (suggested meaning) |
| मूलतत्त्वम् | स्फोटः (अखण्डार्थवाहकः) | व्यञ्जना (ध्वननशक्तिः) |
| अर्थस्तरम् | शब्दार्थः / वाक्यार्थः | व्यङ्ग्यार्थः (वाच्यातिरिक्तः) |
| उद्देश्यम् | भाषातत्त्वस्य दार्शनिकं ज्ञानम् | काव्यसौन्दर्यस्य रहस्यम् |
| दार्शनिकाधारः | शब्दब्रह्मवादः (अद्वैतात्मकः) | रसवादः (सौन्दर्यात्मकः) |
| भाषास्तरम् | परा,पश्यन्ती,मध्यमा,वैखरी | वाच्य,लक्ष्य,व्यङ्ग्य |
| प्रमुखव्याख्याता | मण्डनमिश्रः, कौण्डभट्टः, नागेशः | अभिनवगुप्तः (लोचनम्) |
| आधुनिकसाम्यम् | Saussure, Chomsky | Pragmatics, Implicature |

## शब्दब्रह्मणः एकीतदृष्टि

स्फोटवादस्य ध्वनिसिद्धान्तस्य च समन्वयात् शब्दब्रह्मणः एकीकृता दृष्टिः प्राप्यते। भर्तृहरिः वाक्यपदीये1 शब्द. तत्त्वम् एव ब्रह्म इति प्रतिपादयति, अनादि, निधनं, अक्षरं शब्दब्रह्म एव विश्वस्य मूलकारणम्। अस्मिन् दृष्टिकोणे भाषा केवलं सम्प्रेषणसाधनं नास्ति अपितु सत्तायाः मूलतत्त्वम् एव। भर्तृहरेः मते चौतन्यं शब्दात्मकम् अस्ति, विश्वस्य सर्वे व्यवहाराः शब्दपूर्वकाः सन्ति, शब्दं विना कोऽपि ज्ञानव्यवहारः असम्भवः। न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमाद् ऋते (वाक्यपदीयम् १.१३१) इति भर्तृहरेः प्रसिद्धं वचनम्, अर्थात् संसारे कोऽपि प्रत्ययः (ज्ञानम्) शब्दं विना नास्ति। अयं शब्दब्रह्मवादः भारतीयदर्शनस्य अद्वितीयं योगदानम् अस्ति यत् भाषां तत्त्वमीमांसायाः केन्द्रे स्थापयति। शब्दब्रह्मवादः अद्वैतवेदान्तस्य ब्रह्मवादेन सह गहनं साम्यं धारयति, यथा शङ्करस्य मते ब्रह्म एकमेव अद्वितीयं सत्यम् तथा भर्तृहरेः मते शब्दब्रह्म एकमेव अद्वितीयं तत्त्वम्।

ध्वनिसिद्धान्तस्य दृष्ट्या काव्यानुभवः शब्दब्रह्मणः साक्षात्कारस्य एकं माध्यमम् अस्ति। अभिनवगुप्तस्य मते रसानुभवः ब्रह्मानन्दसहोदरः अस्ति।[3] यदा श्रोता काव्ये रसं अनुभवति तदा तस्य चेतसि एकः अद्वितीयः आनन्दः उत्पद्यते यः सांसारिकसुखात् सर्वथा भिन्नः अस्ति। अयम् आनन्दः ब्रह्मानन्दस्य प्रतिबिम्बः अस्ति इति अभिनवगुप्तस्य मतम्। साधारणीकरणप्रक्रियया सहृदयश्रोता स्वकीयव्यक्तिगतसन्दर्भात् उन्मुक्तः भूत्वा सामान्यमानवीयभावस्तरे रसम् अनुभवति, यथा योगी ध्याने आत्मानं व्यक्तिगतसीमाभ्यः मुक्तं कृत्वा ब्रह्मानन्दम् अनुभवति। एवं ध्वनिसिद्धान्तः काव्यानु.

भवं आध्यात्मिकानुभवेन संयोजयति। स्फोटवादः भाषायां ब्रह्मणः उपस्थितिं प्रतिपादयति, ध्वनिसिद्धान्तः तु काव्ये तस्य ब्रह्मणः साक्षात्कारं प्रतिपादयति, एवम् उभौ मिलित्वा शब्दब्रह्मणः समग्रं दर्शनं निर्मान्ति। इङ्गाल्सादिमहोदयैः[9] अस्य सिद्धान्तस्य सूक्ष्मताः विस्तरेण प्रदर्शिताः।

आधुनिककाले शब्दब्रह्मणः अवधारणायाः प्रासङ्गिकता पाश्चात्यदर्शनेन सह तुलनया स्पष्टा भवति। सोस्यूरमहोदयस्य (Ferdinand de Saussure) भाषाविज्ञाने संदहनम (भाषाव्यवस्था) चंतवसम (भाषाप्रयोगः) इति भेदः भर्तृहरेः स्फोट,ध्वनि भेदेन साम्यं धारयति, संदहनम यथा स्फोटः नित्यः व्यवस्थात्मकः, चंतवसम यथा ध्वनिः अनित्यः प्रयोगात्मकः। विट्गेन्स्टाइनमहोदयस्य (Ludwig Wittgenstein) भाषायाः सीमाः एव मम संसारस्य सीमाः (Tractatus 5.6) इति उक्तिः भर्तृहरेः शब्दब्रह्मवादेन प्रतिध्वन्यते, उभयत्र भाषा सत्तायाः सीमानिर्धारिणी। हाइडेगरमहोदयस्य भाषा सत्तायाः गृहम् (Language is the house of Being) इति अवधारणा अपि शब्दब्रह्मवादस्य प्रतिध्वनिः इव प्रतीयते। ब्रॉमहादयेन[15] संस्कृतवैयाकरणानां सामान्यभाषाविज्ञानिकचिन्तनस्य महत्त्वं प्रतिपादितम्। एतानि साम्यानि प्रदर्शयन्ति यत् भारतीयभाषादर्शनं सहस्रवर्षपूर्वम् एव तानि तत्त्वानि अन्वेषितवत् यानि पाश्चात्यदार्शनिकाः विंशतिशतके प्राप्तवन्तः।

## आधुनिकभाषाविज्ञाने स्फोटध्वन्योः प्रासङ्गिकता

आधुनिकभाषाविज्ञानस्य सन्दर्भे स्फोटवादस्य ध्वनिसिद्धान्तस्य च प्रासङ्गिकता अत्यन्तं महत्त्वपूर्णा अस्ति। सोस्यूरमहोदयस्य संरचनावादे (structuralism) भाषा चिह्नानां व्यवस्था (system of signs) मन्यते यत्र प्रत्येकं चिह्नं signifier (ध्वन्यात्मकरूपम्) signified (अर्थः) इति द्वयोः संयोगात् निर्मितम्। अयं signifier, signified भेदः भर्तृहरेः ध्वनि, स्फोट भेदेन साम्यं धारयति, यथा ध्वनिः स्फोटस्य अभिव्यञ्जकः तथा signifier signified, अस्य वाहकः। किन्तु मूलभूतः भेदः अयम् अस्ति यत् सोस्यूरस्य मते चिह्नसम्बन्धः arbitrary (यादृच्छिकः) अस्ति, भर्तृहरेः मते तु शब्दार्थसम्बन्धः स्वाभाविकः नित्यश्च। अयं भेदः महत्त्वपूर्णः अस्ति यतः सोस्यूरस्य भाषाविज्ञानं सांस्कृतिकसापेक्षम् अस्ति किन्तु भर्तृहरेः शब्दब्रह्मवादः सार्वभौमः। चोम्स्कीमहोदयस्य (Noam Chomsky) सृजनात्मकव्याकरणे (generative grammar) गहनसंरचना,पृष्ठसंरचना (deep structure, surface structure) भेदः भर्तृहरेः वाक्स्तरैः (पश्यन्ती,मध्यमा,वैखरी) सह विशेषं साम्यं प्रदर्शयति। चोम्स्कीस्य गहनसंरचना भर्तृहरेः मध्यमायाः सदृशी अस्ति यत्र अर्थसंरचना विद्यते किन्तु ध्वन्यात्मकरूपं न प्राप्तम्, पृष्ठसंरचना तु वैखर्याः सदृशी यत्र ध्वन्यात्मकरूपं प्राप्तम्। कावर्डराजाभ्यां[6] एतत् साम्यं विस्तरेण विमृष्टम्। स्टालमहोदयेन[19] च अधिभाषाविषयकचिन्तनस्य भारतीयपृष्ठभूमिः प्रदर्शिता।

संज्ञानात्मकभाषाविज्ञानस्य (cognitive linguistics) क्षेत्रे भर्तृहरेः प्रतिभासिद्धान्तः विशेषतया प्रासङ्गिकः अस्ति। प्रतिभा इति अखण्डवाक्यार्थज्ञानं यत् एककालं श्रोतुः चेतसि स्फुरति, अयम् अवधारणा आधुनिकसंज्ञानविज्ञानस्य 'gestalt perception' सिद्धान्तेन सह साम्यं धारयति। यथा मनोवैज्ञानिकाः वदन्ति यत् प्रत्यक्षज्ञानं समग्रम् (holistic) अस्ति भागशः न भवति, मनुष्यः प्रथमं समग्रं दृश्यं गृह्णाति ततः भागान् विभजति, तथा भर्तृहरिः वदति यत् वाक्यार्थज्ञानं प्रतिभात्मकं समग्रम् अस्ति पदार्थसंयोगजन्यं न भवति। ध्वनिसिद्धान्तस्य सन्दर्भे आधुनिकव्यवहारवादी (pragmatics) भाषाविज्ञानस्य 'implicature' (ग्राइसमहोदयस्य conversational implicature) सिद्धान्तः व्यङ्ग्यार्थेन सह साम्यं धारयति, उभयत्र उक्तार्थात् अतिरिक्तः सूचितार्थः प्रतीयते। यथा ग्राइसमहोदयस्य मते अत्र उष्णं वर्तते इति उक्तौ वातायनम् उद्घाटय इति अर्थः सूचितः भवति, तथा ध्वनिसिद्धान्ते वाच्यार्थात् अतिरिक्तः व्यङ्ग्यार्थः प्रतीयते। मैटिलालमहोदयेन[8] भारतीयभाषाचिन्तनस्य आधुनिकभाषाविज्ञाने योगदानं समग्रतया प्रतिपादितम्। कार्डोनामहोदयेन[12] पाणिनीयपरम्परायाः आधुनिकप्रासङ्गिकता प्रदर्शिता। एवम् आधुनिकभाषाविज्ञानस्य अनेके सिद्धान्ताः भारतीयपरम्परायां पूर्वम् एव विद्यमानाः आसन् इति स्पष्टम्।

## उपसंहारः

अस्मिन् शोधपत्रे स्फोटवादस्य ध्वनिसिद्धान्तस्य च समग्रं तुलनात्मकम् अध्ययनं प्रस्तुतम्। उभौ सिद्धान्तौ भारतीयभाषाचिन्तनस्य शिखरतत्त्वौ स्तः, स्फोटवादः व्याकरणदर्शनस्य, ध्वनिसिद्धान्तः काव्यशास्त्रस्य। भर्तृहरिः[1] शब्दब्रह्मणः सिद्धान्तं प्रतिपाद्य भाषायाः दार्शनिकस्वरूपं प्रकटयति, भाषा ब्रह्मणः अभिव्यक्तिः, शब्दतत्त्वम् एव परमसत्ता, सर्वं ज्ञानं शब्दपूर्वकम्। आनन्दवर्धनः[3] ध्वनिसिद्धान्तं प्रतिपाद्य भाषायाः सौन्दर्यात्मकस्वरूपं प्रकटयति, काव्ये व्यङ्ग्यार्थः ध्वन्यते यः काव्यस्य आत्मा अस्ति, रसानुभवः काव्यस्य परमप्रयोजनम्। स्फोटवादस्य ऐतिहासिकविकासः पाणिनेः कालात् नागेशभट्टपर्यन्तं सहस्रवर्षाधिकं व्याप्नोति, ध्वनिसिद्धान्तस्य विकासः आनन्दवर्धनात् अभिनवगुप्तपर्यन्तं काश्मी-

रसम्प्रदायस्य गौरवम् अस्ति। उभौ मिलित्वा शब्दब्रह्मणः पूर्णं चित्रं प्रस्तुवतः, दार्शनिकपक्षः सौन्दर्यशास्त्रीयपक्षश्च , यथा सूर्यस्य प्रकाशः उष्णता च एकस्य सूर्यस्य भिन्ने शक्ती।

आधुनिककाले एतयोः सिद्धान्तयोः प्रासङ्गिकता बहुविधा अस्ति। पाश्चात्यभाषाविज्ञाने संरचनावादः, सृजनात्मकव्याकरणः, संज्ञानात्मकभाषाविज्ञानश्च स्फोटवादेन सह गहनं साम्यं धारयन्ति। व्यवहारवादी भाषाविज्ञानं ध्वनिसिद्धान्तेन सह साम्यं धारयति। एतेषां साम्यानां विमर्शः प्रदर्शयति यत् भारतीयभाषाचिन्तनं सहस्रवर्षपूर्वम् एव तानि तत्त्वानि अन्वेषितवत् यानि पाश्चात्यविद्वांसः विंशतिशतके आरभ्य अन्वेष्टुं प्रवृत्ताः। भर्तृहरेः भाषास्तरसिद्धान्तः (परा,पश्यन्ती, मध्यमा, वैखरी) चोम्स्कीमहोदयस्य गहनसंरचनासिद्धान्तात् अधिकं व्यापकः गहनश्च अस्ति[6] यतः भर्तृहरिः भाषायाः आध्यात्मिकस्तरम् अपि समाविशति यत् चोम्स्कीस्य सिद्धान्ते नास्ति। अतः भारतीयभाषाचिन्तनस्य आधुनिकभाषाविज्ञानसंवादे योगदानं महत्त्वपूर्णम् अस्ति। स्फोटवादस्य ध्वनिसिद्धान्तस्य च समन्वितम् अध्ययनं न केवलं भारतीयदर्शनस्य अवगमने सहायकम् अस्ति अपितु आधुनिकभाषाविज्ञानस्य सम्पुष्टौ अपि महत्त्वपूर्णं योगदानं करोति। भविष्ये एतयोः सिद्धान्तयोः आधुनिकसंज्ञानविज्ञानेन, कृत्रिमबुद्धिमत्तायाः भाषाप्रक्रमणेन (NLP), तात्त्विकभाषाविज्ञानेन च सह संवादः अधिकं फलप्रदः भविष्यति इति अस्माकं विश्वासः।

## Author's Declaration:

I/We, the author(s)/co-author(s), declare that the entire content, views, analysis, and conclusions of this article are solely my/our own. I/We take full responsibility, individually and collectively, for any errors, omissions, ethical misconduct, copyright violations, plagiarism, defamation, misrepresentation, or any legal consequences arising now or in the future. The publisher, editors, and reviewers shall not be held responsible or liable in any way for any legal, ethical, financial, or reputational claims related to this article. All responsibility rests solely with the author(s)/co-author(s), jointly and severally. I/We further affirm that there is no conflict of interest financial, personal, academic, or professional regarding the subject, findings, or publication of this article.

## सन्दर्भग्रन्थसूची


1. Bhartrhari. Vākyapadīya. Edited by Wilhelm Rau. Wiesbaden: Franz Steiner Verlag, 1977.
2. Patañjali. Vyākarana,Mahābhāya. Edited by F. Kielhorn. 3 vols. Bombay: Government Central Press, 1880–1885.
3. Ānandavardhana. Dhvanyāloka with Locana Commentary of Abhinavagupta. Edited by Pattabhirama Sastri. Varanasi: Chowkhamba Sanskrit Series Office, 1940.
4. Pānini. Aasādhyāyī. Translated by Sumitra M. Katre. Austin: University of Texas Press, 1987.
5. Kumārila Bhatta. Ślokavārttika. Edited by Dwarikadas Shastri. Varanasi: Tara Publications, 1978.
6. Coward, Harold G., and K. Kunjunni Raja, eds. The Philosophy of the Grammarians. Princeton: Princeton University Press, 1990.
7. Iyer, K. A. Subramania. Bhartnhari: A Study of the Vākyapadīya in the Light of the Ancient Commentaries. Poona: Deccan College, 1969.
8. Matilal, Bimal Krishna. The Word and the World: India's Contribution to the Study of Language. Delhi: Oxford University Press, 1990.
9. Ingalls, Daniel H. H., Jeffrey Moussaieff Masson, and M. V. Patwardhan, trans. The Dhvanyāloka of Ānandavardhana with the Locana of Abhinavagupta. Cambridge, MA: Harvard University Press, 1990.
10. De, S. K. History of Sanskrit Poetics. 2nd ed. Calcutta: Firma K. L. Mukhopadhyay, 1960.
11. Houben, Jan E. M. The Sambandha,Samuddeśa and Bhartnhari's Philosophy of Language. Groningen: Egbert Forsten, 1995.
12. Cardona, George. Pānini: A Survey of Research. The Hague: Mouton, 1976.
13. Siderits, Mark. "Bhartrhari and the Buddhists." Journal of Indian Philosophy 19, no. 1 (1991): 75–93.
14. McCrea, Lawrence J. The Teleology of Poetics in Medieval Kashmir. Cambridge, MA: Harvard University Press, 2008.
15. Brough, John. "Theories of General Linguistics in the Sanskrit Grammarians." Transactions of the Philological Society (1951): 27–46.
16. Deshpande, Madhav M. "Sentence,Cognition and Theories of Verbal Denotation." Journal of Indian Philosophy 9 (1981): 367–389.
17. Pollock, Sheldon. The Language of the Gods in the World of Men: Sanskrit, Culture, and Power in Premodern India. Berkeley: University of California Press, 2006.
18. Bronkhorst, Johannes. "Studies on Bhartrhari, 1: 'Vākyapadīya' 2.119 and the Early History of Sphota." Journal of Indian Philosophy 19, no. 1 (1991): 43–73.

19. Staal, J. F. "The Concept of Metalanguage and Its Indian Background." Journal of Indian Philosophy 3 (1975): 315–354.
20. Raja, K. Kunjunni. Indian Theories of Meaning. Madras: Adyar Library, 1963.


## Cite this Article-

***" Dr. Lathakumary. P. C", " स्फोटः ध्वनिश्च, शब्दब्रह्मणः द्वे व्याख्ये***" Shodhpith International Multi-disciplinary Research Journal, ISSN: 3049-3331 (Online), Volume:2, Issue:03, May-June 2026

“Copyright © 2026 The Author(s). This work is licensed under Creative Commons Attribution 4.0 (CC-BY), allowing others to use, share, modify, and distribute it with proper credit to the author.”